# प्रथम प्रकरणम्

# प्रस्तावना

## १.१ प्रास्ताविकः –

अद्यतनं युगं तु तन्त्रविज्ञानस्य युगं वर्तते ।अस्मिन् लोके ये के घटनाक्रमाः भवन्ति तस्य ज्ञानं जनाः प्रसारमाध्यमेन प्राप्नुवन्ति । प्राचीनकालतः आत्मनः विचाराः अन्यान् ज्ञापयितुं, कुटुंबीयानां, ग्रामस्थानां कुशलम् अन्यान् ज्ञापयितुं सन्देशवाहकानां साहाय्येन सन्देशानाम् आदानं प्रदानं कृत्वा प्रसारमाध्यमानां कर्तव्यानां पूर्तता एव साधयति । अग्रे एतदेव कार्यं लोककलानां माध्यमेन सम्पद्यते । यथा कीर्तनस्य, प्रवचनस्य, लोकनाट्यस्य, भारूढस्य, भजनस्य च माध्यमेन प्रेक्षकाणां मनसि उत्तमाः संस्काराः अभवन् ।

कालक्रमेण मनुष्यस्य विकासः अभवत् तदनुसारं विविधप्रकारकाणि संवादसाधनानि मनुष्यैः निर्मितानि। केऽपि वार्ताः, विविधेषु क्षेत्रेषु नूतनानि आविष्काराणि, कल्लोलपूर्णा घटना, क्रीड़ाक्षेत्रेस्य सूचना, भाग–विपणिविषयकं ज्ञानं तत्र यद् आदानप्रदानं भवेत्, सर्वकारस्य नूतनायोजनाः एतादृशं काश्चनापि ज्ञानं सर्वसामान्यान् दातुं प्रसारमाध्यमसदृशं साधनं कोऽपि नास्ति इति जनानां मनसि अस्ति । तेन प्रसारमाध्यमानां क्षेत्रेषु उपग्रहैः क्रांति एव संपद्यते । विश्वं संपूर्णतया समीपं आगच्छति । दृक् श्राव्य, दृक्–श्राव्य एतादृशः संयोगः प्रसारमाध्यमेन एव साधयति । सर्वाणि प्रसारमाध्यमानि स्वस्य क्षेत्रे महत्त्वपूर्णानि वर्तन्ते।

### १.१.१ प्रसारमाध्यमानां प्रकाराः –

| मुद्रितः (Print Media) | अमुद्रितः (Electronic Media) |
|---|---|
| १) दैनिकानि–वृत्तपत्राणि | १) आकाशवाणी |
| २) मासिकानि | २) दूरदर्शनम् |

| | |
|---|---|
| ३) नियतकालिकानि | ३) संगणकः |
| ४) हस्तपुस्तकानि | ४) आन्तरजालम् |
| ५) सूचनापुस्तिका | ५) भ्रमणध्वनिः |
| ६) भित्तिपत्रकाणि | ६) डिजिटल क्रांती |
| ७) दिनदर्शिकाः | ७) फलकः |
| ८) लघुचित्रपटाः | ८) फेसबुक |
| ९) विज्ञापनानि | ९) व्हॉटस् अप |
| १०) चलचित्रपट्टिकाः | १०) ट्विटर |

**१.१.२ प्रसारमाध्यमानां दुष्परिणामाः –**

बहवः छात्राः प्रश्नानाम् उत्तराणि आन्तरजालस्य माध्यमेन एव ज्ञातुम् इच्छन्ति । अतः तेषां ग्रन्थपठनाय रुचिः न भवति । परिणामतः तेषां क्रियाशिलता न्यूनीभूता जायते। छात्राः आन्तरजालमाध्यमेन सर्वेषां प्रश्नानाम् उत्तराणि विनापरिश्रमेण प्राप्नुवन्ति अतः तेषां अध्ययने रुचिः न्यूना भवति ।

बहवः छात्राः एकस्मिन् समये अनेकानि कार्याणि कुर्वन्ति । उदाहरणार्थं कक्षासु अध्ययनरताः छात्राः तस्मिन्नेव समये आन्तरजालेऽपि कार्यरताः भवन्ति। कक्षायां शिक्षकाः यद् पाठयन्ति तत् ते दुर्लक्ष्यीकुर्वन्ति । तेन तेषां शालेयस्तरः न्यूनं जायते।

बहवः छात्राः सर्वदा समाजमाध्यमेषु (Social Media) एव कार्यरताः दृश्यन्ते । तेन वृथा समययापनं भवति तथा समाजेन, मित्रेण सह तेषां संपर्कः खण्डितः भूत्वा ते एकाकिनः भवन्ति । परिणामतः शीघ्रकोपित्वम्, एकाकीत्वम्, नैराश्यं, वैफल्यं, एतादृशी समस्या ग्रस्ताः

भवन्ति। ये छात्राः अधिकाधिकं समयः प्रसार–माध्यमस्य कृते व्ययं कुर्वन्ति तेषां सामाजिकजीवने बांधवैः, मित्रैः सह सम्बन्ध स्थापयितुं असमर्थाः भवन्ति। केषां समक्षं सम्भाषणं कर्तुं ते असमर्थाः भवन्ति । परिणामतः आत्मविश्वासस्य अभावः वर्तते।

### १.१.३ प्रसार–माध्यमानां लाभाः –

प्रसारमाध्यमानाम् उपयोजनेन छात्राणां काचित् गुणानां विकासः भवति । तेन तेषां मित्रेण सह साहचर्यं वृद्धिं भवति ।

सामाजिकमाध्यमानां लाभः व्यापारेषु जगत्सु एव भवति । तेन माध्यमेन व्यवसायस्य विज्ञापनानि सुलभतया वेगनेच कर्तुं शक्यन्ते । तेन माध्यमेन विज्ञापनस्य अथवा ज्ञानस्य शीघ्रतया अधिकाधिकं जनानां समक्षं प्रस्तुतीकरणं सुलभतया भवति ।

अधिकाधिकं समयं संगणकस्य पुरतः व्यतीत्य नूतनेन तंत्रज्ञानेन सह छात्राणां परिचयः भवति। शैक्षणिकं तथा व्यावसायिकं प्रगतिं साधयितुं संगणकः तथा आन्तरजालम् अत्यन्तं महत्त्वपूर्णं कार्यं करोति । तेन साहाय्येन छात्राणां कौशल्यविकासः अप्रत्यक्षतया सहजतया भवति ।

### १.१.४ छात्राणां शैक्षणिक – सम्पादनक्षमतायां भूयमानाः परिणामाः –

१) स्मरणशक्तेः न्यूनत्वम् ।

२) एकाकीत्वम्।

३) अभिरुचेः न्यूनत्वम् ।

४) उत्तमवातावरणस्य अभ्यासः।

**मानसिक स्वास्थ्यम् –**

मनुष्यस्य जीवनं कदापि सूत्रमिव सरलं न । दुःखं सुखं च अपेक्षते । मनुष्यस्य जीवने यथा आनन्दस्य क्षणम् आयाति तथैव दुःखं अपयशः च अपि आयाति। यशं अपयशं, जयं पराजयं इत्येतेषां क्रीडा मनुजजीवने अव्याहतं प्रचलति । सुखेन समाहितं जीवनयापनमिति सर्वेषां पुरतः विद्यमानं महदाह्वानम् । जीवने नैकान् अवरोधान् लङ्घयित्वा जीवितस्य ध्येयं प्राप्तुं प्रयत्नाः करणीयाः भवन्ति । जीवने समायोजनं तु आवश्यकम् । सर्वमपि आत्मानुकूलं भवेदेव इति आग्रहः तु अनावश्यकः । स्वजीवितं अधिकरूपेण कार्यक्षमतया दायित्वं स्वीकृत्य च यापनीयं भवति । सर्वमिदं मानसिकस्वास्थ्यान्तर्गतं भवन्ति ।

"Mental Hygiene may be defined as the prevention of mental illness pro of mental health and cure of mental illness."

**- Crow and Crow**.

**सर्जनशीलता –**

सर्जनशीलता न केवला अलौकिकी बुद्धिमत्ता अपि तु बुद्धिमत्तायाः अपि परे अस्याः स्थानम्। बुद्धिमत्ता एव सर्जनशीलता च जनिं लभते, बुद्धिमत्ता इति मानसिकी शक्तिः इति मत्वा मानसशास्त्रज्ञैः बुद्धयाः विविधघटकाः अन्वेषितः तदाधृत्य बुद्धयाः नैकाः व्याख्याः, नैकाः सिद्धान्ताः तथा नैकाः बुद्धिमापन परीक्षाः निर्मिताः ।

**गिलफोर्ड – ''सर्जनशीलता इत्युक्ते न केवलं अलौकिकं बुद्धिमत्तां एता बुद्धिमतायाः परे वर्तते।''**

**टेलर – ''सर्जनशीलता एका प्रक्रिया वर्तते । यया ज्ञानस्य नवनिर्मितिः भवति।''**

## १.२ संशोधनस्य महत्त्वम् आवश्यकता च –

छात्राणां सर्वांगीणविकासः इति शिक्षायाः महत्त्वपूर्णं क्षेत्रमस्ति । इदानीं शिक्षापद्धतिः विद्यार्थी केन्द्रिता एव । अद्यतनयुगं तु तन्त्रविज्ञानं अस्ति अतः सङ्गणक – दूरदर्शन – आकाशवाणी – इत्यादीनाम् उपयोगं छात्राः बहुशः कुर्वन्ति । एकविंशतितमयां शताब्द्यां निवसन्त छात्राः प्रसारमाध्यमाध्यमेषु अधिकरुपेण रुचिं दर्शयन्ति । अतः नित्यनूतनेषु शोधकार्येषु रताः छात्राः वृथा समयं यापयन्ति । प्रसारमाध्यमानां प्रयोगाधिक्येन छात्राणां जीवने मनोभारः, चिन्ता, वैफल्यं, व्यवहारपरिवर्तनं च इत्यादयाः समस्याः दृश्यन्ते । तेषां प्रभावः तेषां जीवने दृश्यते ।

छात्राणां याः समस्याः सन्ति तासां निवारणार्थं सहाय्यं भवेत् अतः संशोधनविषयस्य आवश्यकता वर्तते । छात्रेषु विद्यमानं न्यूनगण्डं न्यूनीकृत्य शिक्षायाः प्रवाहे तेषां प्रवेशस्य मार्गं सुगमं कारयितुं शक्यते अतः संशोधनं महत्त्वपूर्णं वर्तते ।

## १.३ संशोधनस्य विधानम् –

माध्यमिकस्तरीय छात्राणां सर्जनशीलतायां, मानसिकस्वास्थ्ये, शैक्षणिकसम्पादन–क्षमतायां च प्रसारमाध्यमानां परिणामानाम् अध्ययनम् ।

## १.४ संशोधनपदानां कार्यात्मकव्याख्या :

१) माध्यमिकस्तरः – अष्टमीकक्षातः दशमीकक्षापर्यन्तं शिक्षणस्य स्तरः माध्यमिकस्तरः इति उच्यते ।

२) छात्रः – ज्ञानस्य ग्रहणं यः करोति सः छात्रः ।

३) सर्जनशीलता – इयं एका क्रिया या नवनिर्मितौ पुनर्वसति तथा सा एव कृतिः कदाचित् उपयुक्ता भवति ।

४) मानसिकस्वास्थ्यम् – समायोजनक्षमता–विचार–निरीक्षण–कर्तृत्वशक्ति–बौद्धिकभावनिक–कौशल्यविचार– आत्मविश्वासादीनां समावेशः मानसिकस्वास्थ्ये भवति ।

५) शैक्षणिकसम्पादनम् – 'माध्यिमिकस्तरस्य नवमी–कक्षायाः छात्राणां शैक्षणिकी प्रगतिः नाम शैक्षणिकं सम्पादनम् ।

६) प्रसारमाध्यमानि – प्रसारमाध्यमेषु दूरदर्शनम्, आकाशवाणी, सङ्गणकः, वृत्तपत्राणी, नियतकालिकानि, मासिकानि, फेसबुक, सङ्केतस्थलानि एतेषां सर्वेषां समावेशः वर्तते ।

७) परिणामः – कैश्चित् विशिष्टघटकैः अन्यघटकेषु भूयमानं परिवर्तनं नाम परिणाम :।

## १.५ संशोधनस्य उद्देश्यानि –

१) माध्यमिकस्तरीय – छात्राणां सर्जनशीलतायाः उपरि प्रसारमाध्यमानां परिणामानाम् अध्ययनम् ।

२) माध्यमिकस्तरीय – छात्राणां मानसिकस्वास्थ्यस्योपरि प्रसारमाध्यमानां परिणामानाम् अध्ययनम् ।

३) माध्यमिकस्तरीय छात्राणां शैक्षणिकसम्पादनस्योपरि प्रसारमाध्यमानां परिणामानाम् अभ्यासः।

४) छात्राणां सर्जनशीलतायाः मानसिकस्वास्थ्यस्य च इत्यनयोः उपरि परिणामयोः प्रसारमाध्यमानां तुलनाकरणीया।

५) छात्राणां सर्जनशीलतायाः शैक्षणिकसम्पादनस्य च इत्यनयोः उपरि प्रसारमाध्यमानां परिणामानां तुलना करणीया।

६) छात्राणां मानसिकस्वास्थ्यस्य तथा शिक्षासम्पादनस्य च इत्यनयोः उपरि प्रसारमाध्यमानां परिणामानां तुलना ।

## १.६ संशोधनस्य गृहीतकानि –

१) माध्यमिकस्तरीय छात्राः प्रसारमाध्यमानाम् अतिशयेन प्रयोगं कुर्वन्ति।

२) मनुष्यस्य कार्यक्षमता तस्य मानसिकस्वास्थ्यस्य आधारितः वर्तते।

३) प्रत्येकमपि मनुष्यस्य न्यूनाधिकरुपेण सर्जनशीलता वर्तते ।

## १.७ संशोधनस्य परिकल्पना –

१) माध्यमिकस्तरस्य छात्राणां सर्जनशीलतायाः उपरि प्रसारमाध्यमस्य उपयोगं धनात्मकं प्रभावं नैव दृश्यते।

२) माध्यमिकस्तरस्य छात्राणां मानसिकस्वास्थ्यस्योपरि प्रसारमाध्यमस्य धनात्मकं परिणामं नैव दृश्यते ।

३) माध्यमिकस्तरस्य छात्राणां शैक्षणिकसम्पादनक्षमतायाः उपरि प्रसारमाध्यमाध्यमानां धनात्मकपरिणामः न दृश्यते ।

४) प्रसारमाध्यमानाम् उचितरुपेण प्रयुज्यतां छात्राणां तथा आतिशयेन प्रयुज्यतां छात्राणां सर्जनशीलतायां सार्थकभेदः न दृश्यते ।

५) प्रसारमाध्यमानाम् उचितरुपेण प्रयुज्यतां छात्राणां तथा आतिशयेन प्रयुज्यतां छात्राणां मानसिकस्वास्थ्ये सार्थकभेदः न दृश्यते ।

६) प्रसारमाध्यमानाम् उचितरुपेण प्रयुज्यतां छात्राणां तथा आतिशयेन प्रयुज्यतां छात्राणां शैक्षणिकसम्पादनक्षमतायां सार्थकभेदः न दृश्यते ।

७) माध्यमिकस्तरीय बहवः छात्राः प्रसारमाध्यमानाम् आतिशयेन उपयोगं कुर्वन्ति। तत्र बालकानां तथा बालिकानां च मध्ये भेदः न दृश्यते ।

८) नगर–उपनगरक्षेत्रयोः छात्राणां प्रसारमाध्यमानाम् उपयोगमध्ये सार्थकभेदः न दृश्यते ।

९) नगर–उपनगरक्षेत्रयोः छात्राणां सर्जनशीलतायां सार्थकभेदः न दृश्यते ।

१०) नगर–उपनगरक्षेत्रयोः छात्राणां मानसिकस्वास्थ्ये सार्थकभेदः न दृश्यते ।

११) नगर–उपनगरक्षेत्रयोः छात्राणां शैक्षणिक–सम्पादनक्षमतायां सार्थकभेदः न दृश्यते।

**१.८ व्याप्तिः मर्यादा च**

१) महाराष्ट्रराज्यस्य विदर्भप्रान्तं प्रस्तुतानुसन्धानस्य व्याप्तिः वर्तते ।

**मर्यादाः –**

१) प्रस्तुतं संशोधनार्थं विदर्भेषु नागपुरम्, अमरावती, यवतमाळ, वर्धा, अकोला, बुलढाणा, वाशिमः च इति सप्तजनपदानां समावेशः कृतः ।

२) प्रस्तुतानुसन्धाने सप्तजनपदान्तर्गतं नागरीं तथा अर्धनागरीं च विभागानां समावेशः कृतः ।

३) प्रस्तुतसंशोधने माध्यमिकस्तरस्य –नवमी–कक्षायाः छात्रान् समावेशः कृतः।

४) प्रस्तुतसंशोधने प्रतिजनपदेषु षोड़शः माध्यमिक विद्यालयानां समावेशः कृतः।

५) प्रस्तुतसंशोधने जनपदेषु प्रतिनगरं १६ x ७ = ११२ विद्यालयानां समावेशः कृतः ।

६) प्रस्तुतसंशोधनं प्रसारमाध्यमस्य पर्यन्तं मर्यादितं अस्ति ।

*-*-*

# द्वितीय प्रकरणम्

# पूर्वसंशोधनस्य समीक्षा

## २.१ सम्बन्धितस्य संशोधनसाहित्यस्य समीक्षा

### १) **Burwani, Rupa G. (१९९१)**

"An enquiry into the nature of self-concept in the area of competence and its impact on mental health and academic achievement."

Ph.D. Edu., Vishvabharti Uni. Calcutta

**उद्देश्यानि –**

1. क्षमतायाः वास्तविकी 'स्व' संकल्पना आदर्श स्व संकल्पना एतयोः द्वयोः संकल्पनाना विस्तारः स्वरुपश्च अध्ययनं तथा द्वयोः भेदात्मकतायाः अभ्यासः ।
2. वास्तविकी 'स्व' संकल्पनायाः तथा मानिसक आरोग्यं, शिक्षासम्पादनम् इत्यादिनां सम्बन्धानाम् अभ्यासः ।
3. त्रयाणां समूहानां वाणिज्यं विज्ञानं मिश्र समूहस्य च तुलना।

**निष्कर्षाः**

१. वास्तविकी 'स्व' संकल्पनायाःप्राप्तांकः आदर्शः 'स्व' संकल्पनायाःप्राप्तांकः, वास्तविकं आदर्शभेदनं प्राप्तांकं मानसिकारोग्यं प्राप्तांकं इति सर्वे न्यूनाधिक्येन सामान्यतया प्रतिदर्शेषु विभाजिताः । परन्तु चलराशिषु एतयोः मध्ये विभाजानं नासीत्।

२. वास्तविकी 'स्व' संकल्पना, आदर्श 'स्व' संकल्पना द्वे आपि उच्चस्तरे सहसम्बन्धिन्यौ।

३. उच्च वास्तविकी 'स्व' संकल्पना प्राप्तेन छात्रेण निम्नभेदेन प्राप्तांकः दृश्यते।

४. उच्च आदर्शः 'स्व' संकल्पना, मानसिकस्वास्थ्याय उपयुक्तः इति ज्ञातम् ।

५. वास्तविकी आदर्शः, 'स्व' संकल्पना इत्ययोः भेदाभेदः मानसिकस्वास्थ्येन साहचर्य दर्शितम् ।

६. वास्तविकी आदर्शः, 'स्व' संकल्पना च इति द्वयो भेदाभेदेन वाणिज्यसमूहेषु शिक्षासंपादनं परिणमयते ।

२. **Pandey, R. N. (१९८०)**

"Differences in Mental Ability among social classes."

Ph.D. Psy. , DDU. Uni. Gorakhpur

## उद्दिष्टानि

उच्चसामाजिकः वर्गः, उच्चमध्यमसामाजिकः वर्गः, निम्नमध्यमसामाजिकवर्गः, उच्च–निम्न–सामाजिकः वर्ग, निम्न–निम्न–सामाजिकः वर्गश्च इति एतेषां सामान्यायाः मानसिकी क्षमतायाः अध्ययनम् करणीयम् ।

## निष्कर्षाः –

१) सामान्यमानसिकी क्षमतायाः गुणेषु सर्वेषु सामाजिकेषु समूहेषु भिन्नता दृश्यते ।

२) विभिन्न–घटकेषु सामान्य–मानसिकी–क्षमतायाः परीक्षायाम् उच्च वर्गीयाः छात्राः उत्तमान् गुणान् प्राप्नुवन्ति ।

३) वयोवृद्धे शिक्षायाः च तुलनया सामान्य मानसिकी क्षमातासु परिवर्तनानि न्यूनानि दृश्यन्ते ।

४) सामाजिके स्तरे भेदे मानसिकी क्षमतायै संवेदनशीलता दृश्यते । यदि छात्रा उच्च सामाजिके स्तरे निवसन्ति तर्हि तेषां सामान्य मानसिकी क्षमता अपि उच्चस्तरीया भवितुम् अर्हति ।

**३) रोकडे, मिना (२००५)**

कुमारवयीन – छात्राणां बुद्धिमत्ता, सामाजिकः आर्थिकश्च स्तरः शिक्षाविषयकी चिंता, व्यक्तिमत्त्वसमायोजनं तथा शिक्षासंपादनम् इति एतेषां सम्बधानाम् अध्ययनम् ।

आचार्य (शिक्षणशास्त्रं) संत गाडगेबाबा अमरावती विद्यापीठ, अमरावती.

**उद्दिष्टानि –**

१. नागरी तथा ग्रामीणविभागे माध्यमिकी पाठशालासु नवमीकक्षायाम् अध्ययनशीलानां छात्राणां बुद्धिमत्तायाः संशोधनम् ।

२. नागरी तथा ग्रामीणविभागे च माध्यमिकी पाठशालासु नवमीकक्षायां अध्ययनशीलानां छात्राणां सामाजिकस्तरे तथा शैक्षिकसम्पादने च विद्यमानानां सहसम्बधानां विषये संशोधनम् ।

३. नागरी तथा ग्रामिणविभागे च माध्यमिकी पाठशालासु नवमीकक्षायां अध्ययनशीलानां छात्राणां आर्थिकस्तरे शैक्षिकसंपादने च विद्यमानानां सहसम्बधानां विषये संशोधनम् ।

४. नागरी तथा ग्रामिणविभागे च माध्यमिकी पाठशालासु नवमीकक्षायां अध्ययनशीलानां छात्राणां व्यक्तिगतसमायोजनं शैक्षिकसंपादने च विद्यमानानां सहसम्बधानां विषये संशोधनम् ।

५. नागरी तथा ग्रामिणविभागे च माध्यमिकी पाठशालासु नवमीकक्षायां अध्ययनशीलानां सर्वेषां छात्राणां बुद्धिमत्ता, सामाजिकः–आर्थिकः स्तरः, शिक्षाविषयकीचिन्ता, व्यक्तिमत्वसमायोजनं, शिक्षासम्पादनेषु च विद्यमानानां सहसंबधानां संशोधनम् ।

निष्कर्षा

१) नागरी–ग्रामिणयोः विभागयोः छात्राणां बुद्धिमत्तायां शिक्षासम्पादने च सकारात्मकं सहसम्बन्धाः विद्यमानाः दृश्यन्ते।

२) नागरी–ग्रामिणयोः विभागयोः छात्राणां सामाजिकेस्तरे शिक्षासम्पादने च सकारात्मकं सहसम्बन्धाः विद्यमानाः दृश्यन्ते ।

३) नागरी–ग्रामिणयोः विभागयोः छात्राणां आर्थिकस्तरे शिक्षासम्पादने च सकारात्मकं सहसम्बन्धाः विद्यमानाः दृश्यन्ते।

४) **Anand, S.P. (१९८९)**

"Mental health of high school students"

Indian Educational Review Vol. २४, No. २

उद्देयश्यानि –

१) उच्चमाध्यमिकस्तरीय छात्राणां मानसिकस्य स्वास्थ्यस्य अध्ययनम् ।

निष्कर्ष –

१) कौमार्यावस्थायाः उच्चमाध्यमिकस्तरीय छात्राणां मानसिकंस्वास्थ्यं, शिक्षा सम्पादनं च एतेषां सक्रियः सम्बन्धः पालकानां शैक्षणिकं व्यावसायिकं च स्तरेषु दृश्यते।

## ५) बन्सीबिहारी पण्डितः (१९९७)

''शिक्षकाणां संगणकः अभिवृत्तेः अध्ययनम् ।''

पीएच्.डी. (शिक्षाशास्त्रं) जळगांव विद्यापिठम् जळगावः

**उद्दिष्टानि –**

१) शिक्षकानां सङ्गणकः अभिवृत्तेः संशोधनम् ।

२) शिक्षकानां बोधात्मकी सङ्गणकः अभिवृत्ते संशोधनम् ।

३) शिक्षकानां भावात्मकी सङ्गणकः अभिवृत्ते संशोधनम् ।

४) लिङ्गभेदः, विद्याशाखा संगणकसाक्षरताच इति चलघटकैः शिक्षकानां संगणक अभिवृत्त्यां, बोधात्मकी संगणक च अभिवृत्त्यां, भावात्मकी संगणक–अभिवृत्त्यां सार्थकः भेदः दृश्यते । वा इत्यस्य अध्ययनम् ।

**निष्कर्षाः**

१) पुरुषाणां महिलानां च संगणकीय अनुकूलता दृश्यते ।

२) संगणक अभिवृत्त्यां लिंगभेदस्य विद्याशाखाश्च परिणामः न दृश्यते ।

३) संगणकनिरक्षराणां तुलनया संगणकसाक्षराणां शिक्षकानां संगणक अभिवृत्तिस्तु अनुकूला वर्तते ।

४) संगणकसाक्षरेषु समूहेषु महिलाशिक्षकानाम् अपेक्षया पुरुषशिक्षकानां संगणकः अभिवृत्तिः अनुकूला वर्तते ।

## २.२ प्रस्तुतसंशोधनस्य वैशिष्ट्यम् –

एतस्मिन् प्रकरणे संशोधनसम्बद्धस्य पूर्वसंशोधनस्य समीक्षा वर्तते । समीक्षायां संशोधनविषयक उद्देश्यानां निष्कर्षानां च अध्ययनं वर्तते । पूर्व–संशोधनस्य समीक्षया ज्ञातं यत् मानसिकआरोग्यविषयकं, व्यक्तिमत्त्वे बुद्धिमतायाश्च सम्बधि संशोधनं तु विपुलं किन्तु नास्ति तत् विषयसम्बधिनः । संशोधिकया संशोधनाय ये प्रतिदर्शाः स्विकृताः ते जनसंख्याविषयकं । ताः पूर्वसंशोधनस्य अपेक्षया संपूर्णतया भिन्नाः । तस्मात् एतत् संशोधनं तु भिन्नम् ।

पूर्वसंशोधने छात्राणां सर्जनशीलता, मानसिकस्वास्थ्यं शिक्षासम्पादनं च इति एतेषु प्रसारमाध्यमानां परिणामानां विचारः कुत्रापि न वर्तते । प्रस्तुत–संशोधने माध्यमिकस्तरीय छात्राणां सर्जनशीलता, मानसिकस्वास्थ्यं शिक्षा सम्पादने च प्रसारमाध्यमानां परिणामानाम् अध्ययनम् वर्तते । अत्र छात्राः कुमारवयस्याः सन्ति । तेषां कृते एतत् समयः अतीव महत्त्वपूर्णं वर्तते । सामान्यतया माध्यमिकस्तरीय छात्राः १४ तः १६ इति वयोसमूहस्य वर्तन्ते। एतत् तु नूतन–दिशादर्शक भविष्याय वर्तते ।

आधुनिकं युगं तंत्रज्ञानात्मकं वर्तते । छात्राः नित्यनूतनं ज्ञानं प्राप्तुं शक्नुवन्ति अद्य शिक्षाप्रणालिः तु छात्रकेंद्रिता । इदानीं शिक्षायां आमुलाग्रे परिवर्तनं दृश्यते । तस्य परिणामाः छात्राणां व्यक्तिमत्वे, बुद्धिमत्तायां च दृश्यन्ते । छात्राणां सर्वांगिणं विकासं शक्यमेव । तथैव सर्वेषां परिणामाः शिक्षासम्पादने, मानसिकेस्वास्थ्ये अपि दृश्यन्ते । परिवर्तनं तु व्यक्तिसापेक्ष, परिस्थितीसापेक्षं कालानुरूपं च, तस्मात् प्रस्तुत–संशोधने छात्राणां सर्जनशीलता, मानसिकस्वास्थ्यं, शिक्षासम्पादने च प्रसारमाध्यमानां परिणामानां अध्ययनं नूतनेन दृष्टिकोणेन क्रियते।

उपरिनिर्दिष्टेन विवेचनेन ज्ञातं यत् प्रस्तुतसंशोधनस्य कार्यक्षेत्रं उद्देश्यानि च पूर्व संशोधकानाम् अपेक्षया भिन्नानि वर्तन्ते।

***-*-***

# तृतीय प्रकरणम्

# संशोधनपद्धतिः, साधनानि, कार्यनिर्वहणं च

## ३.१ प्रस्तावना

नूतनज्ञानप्राप्तिः, विद्यमानानाम् तथ्यानां विषये नूतन–दृष्टिकोनस्य प्रस्तुति–करणम्। तथ्यानां विश्लेषणं कृत्वा सबन्धप्रस्थापनम्, पुरातनमापनसाधनेषु परिशीलनम् अथवा अधिककार्यक्षमनुगुणं नूतनसाधनानां निर्मितिं करणीयं तथा तै सहः आत्मनः वैश्विक ज्ञानवर्धनेन प्रगतेः पोषकः वातावरणस्य निर्मितिः करणीयः च इति संशोधनस्य प्रमुखम् उद्देश्यं वर्तते ।

**वेबस्टरः कोशः** – ''संशोधनं नाम कस्याऽपि ज्ञानशाखासु नूतनतत्त्वानां अथवा तथ्यानां संशोधनार्थ तथा पुरातनतत्त्वानि तथ्यानि च परीक्षितुं कृत चिकित्सकः योजनाबद्धः अभ्यासः इति संशोधनम्।''

वस्तुस्थितिं ज्ञातुं कस्यचित् विषयस्य सूक्ष्मतया सम्मिश्ररुपेण कृतमध्ययनम् अथवा वैज्ञानिकी चिकित्सा इति संशोधनम् ।

## ३.२ संशोधनपद्धतयः –

संशोधनपद्धतेः वर्गीकरणं प्रमुखतया निम्नलिखित रुपेण वर्तन्ते

१. ऐतिहासिकी –संशोधनपद्धतिः।

२. प्रयोगात्मकी –संशोधनपद्धतिः।

३. वर्णनात्मकी –संशोधनपद्धतिः।

**३.३ प्रस्तुत–संशोधनस्य पद्धतिः –**

प्रस्तुतसंशोधनस्य विषयः वर्तमानकालीनम् अध्ययनं करोति । अधुना स्पर्धात्मकं युगं वर्तते । सर्वत्र छात्राः शिक्षकानां, पालकानां च अपेक्षया वातावरणेन च भारभूताः। परिणामतः छात्राणां मानसिकस्वास्थ्यम् अव्यवस्थितम् दृश्यते । अतः एतत् सर्वम् अध्ययनार्थं सर्वेक्षणपद्धतिः उपयुक्ता । प्रस्तुत संशोधनार्थं सर्वेक्षणपद्धतेः अवलम्बनं कृतम् ।

**३.४ जनसंख्या**–संशोधनस्य प्रक्रियायां संपूर्णरुपेण जनसंख्यायाः समावेशः दुष्करः।संशोधनार्थं धनस्य कालस्याऽपि अकारणं वर्धनं भवति। एतेन कारणेन प्रतिनिधिरुपेण न्यादर्शः स्वीकृतः।

**३.५ न्यादर्शः**– संशोधनस्य उद्देश्यं साधयितुम् योग्यरुपेण चयनम् अत्यन्तं महत्त्वपूर्णं तथा आवश्यकं वर्तते। जनसंख्यायाः प्रतिनिधिरुपेण कश्चन लघुसमूहस्य चयनमेव न्यादर्शः इति कथ्यते।

**३.६ प्रस्तुतसंशोधनस्य न्यादर्शः –**

प्रस्तुत–संशोधनार्थं संशोधिकया विदर्भाप्रान्तस्य सप्तजनपदानां स्वीकृतिः न्यादर्शरुपेण कृतम् । प्रतिजनपदेषु षोड़शः विद्यालयानां चिताः तेषु नगरेषु अष्ट विद्यालयानां ग्रामात् अष्ट विद्यालयानां चयनं कृतम् ।

प्रतिमाध्यमिकशालाभ्यः दशः बालकानां दशः बालिकानां चयनं कृतम्। आहात्य ११२ माध्यमिकशालाभ्यः २२४० छात्राणां न्यादर्शरुपेण चयनम् कृतं वर्तते ।

**३.७ संशोधनस्य साधनानि –**

प्रस्तुतसंशोधनार्थं संशोधिका स्वनिर्मितिः प्रश्नावली प्रमाणितं परीक्षणं च कृत्वा संशोधने उपयोगं कृतम् । एतैः साधनैः दत्तांशं संकलनं कृत्वा संशोधनं कृतम् ।

प्रस्तुतसंशोधने संशोधिकया मानसशास्त्रीयं प्रामाणिकपरीक्षणस्य उपयोगं कृतमस्ति । यथा –

१) **सर्जनशीलता** – Dr. Baqer Mehdi महोदयस्य Verbal test of Creative Thinking (TCW) इति।

२) **मानसिकस्वास्थ्यम्** – Dr. C.D. Agashe and Dr. R. D. Helode Positive Mental Health Inventory (PMHI)

शैक्षिकसम्पादनार्थं न्यादर्शरुपेण नवमीकक्षायां छात्राणां विगतवर्षीय वार्षिकीपरीक्षायां गुणानाम् आधारेण निश्चितम्।

**३.८ पथदर्शकः अभ्यासः –**

संशोधने प्रत्यक्षरुपेण उद्भूतानां समस्यानाम् अध्ययनं कृत्वा तासां निवारणार्थं लघुरुपेण किन्तु वैज्ञानिक्योः पद्धत्याः संपूर्ण संशोधनप्रक्रियायां पूर्तता इति पथदर्शकः अभ्यासः वर्तते ।''

प्रस्तुतसंशोधने संशोधिकया त्रयाणां माध्यमिकपाठशालानां चयनं सहेतुकपद्धत्या कृतम् । संशोधनस्य उद्देश्यानुसारं 'सर्जनशीलतायाः मानसिकस्वास्थ्यस्य च उपरि प्रसारमाध्यमानां परिणामाः इति विषयाधारितः प्रश्नावलिः निर्माणं कृत्वा पञ्चविषयतज्ञैः परीक्षितम् । तैः सूचितं त्रुटयः निवारणानन्तरं प्रश्नावलिं संशोधनार्थं चितान् छात्रान् प्रेषिता। तेषां प्रतिसादानुसारं च गुणदानम् अभवत् ।

## ३.९ सांख्यिकीयविश्लेषणार्थ तन्त्राणि

१.मध्यमानम् ।

२.प्रमाणविचलनम् ।

३.'टी' परीक्षणम् ।

४.'काई–स्क्वेअर' परीक्षणम्।

५.सहसंबंधाः।

## ३.१० संशोधनस्य प्रत्यक्षं कार्यनिर्वहणम् –

विदर्भाप्रान्तेषु नागपुरं, वर्धा, यवतमालः, अमरावती, अकोला, बुलढाणा, वाशिमः च इति सप्तजनपदानां चयनं संशोधनार्थं कृतम् । प्रत्येकेषु जनपदेषु षोड़शः माध्यमिक पाठशालानां चयनं कृतम्। ततः प्रतिशालाषु १० बालकानां १० बालिकानां च चयनम् कृतम्। तत्र सर्वान् छात्रान् सर्जनशीलता, मानसिकस्वास्थ्यं तथा सर्जनशीलतायाः मानसिकस्वास्थ्ये च प्रसारमाध्यमानां परिणामान् ज्ञातुं प्रश्नावलिं प्रदत्तं। तस्या प्रश्नावल्याः साहाय्येन आधारभूता ज्ञानं संकलिता । अनन्तरं संकलितस्य दत्तांशस्य वर्गीकरणं विश्लेषणं च कृत्वा निष्कर्षाः प्राप्ताः ।

*-*-*

# चतुर्थ प्रकरणम्

# सांख्यिकीयविश्लेषणम् अर्थनिर्वचनञ्च

**४.१ प्रस्तावना –** सङ्कलितदत्तांशस्य तथा तथ्यानां विश्लेषणं कर्तुं सङ्कलितदत्तांशस्य संघटनस्य अनन्तरं परिकल्पनायाः विश्लेषणं प्रतिनिश्चितिः आवश्यकं वर्तते ।

## ४.२ सांख्यिकीयविश्लेषणम् अर्थनिर्वचनञ्च –

### सारणी क्र. ४.१

प्रसारमाध्यमानाम् उचितप्रयोगशीलानां अतिप्रयोगशीलानां च छात्राणां सर्जनशीलतायाः मध्यमानानां तुलना –

| समूहः | छात्र–संख्या | मध्य–मानम् | प्रमाण–विचलनम् | स्वाधिनता–मात्राः | प्रमाण–त्रुटयः | मध्यमानां भेदाः | प्राप्तं '*t*' मूल्यं |
|---|---|---|---|---|---|---|---|
| उचितप्रयोगशीलाः छात्राः | ९६० | ५४.५५ | १९.६२०७ | २१९८ | ०.८१३१ | १५.९१ | १९.५६७* |
| अतिप्रयोगशीलाः छात्राः | १२४० | ३८.६४ | १७.९५९८ | | | | |

०.०५ सार्थकतास्तरेषु सारणी '*t*' मूल्यं १.९६०

*०.०५ सार्थकतास्तरे सार्थकः

उपर्युक्तं सारण्यां एतत् स्पष्टं भवति यत् प्रसारमाध्यमानां अधिकप्रयोगशीलानां छात्राणां तुलनाया उचितप्रयोगशीलानां छात्राणां सर्जनशीलतायां सार्थकभेदः दृश्यते तथा उचितप्रयोगशीलानां छात्राणां सर्जनशीलता उत्तमा वर्तते ।

## सारणी क. ४.२

प्रसारमाध्यमानाम् उचितोपयोगं कुर्वतां छात्राणाम् अपेक्षया अत्युपयोगं कुर्वतां छात्राणां च मानसिकस्वास्थ्यस्य मध्यमानस्य तुलना

| समूहः | छात्र–संख्या | मध्य–मानम् | प्रमाण–विचलनम् | स्वाधिनता–मात्राः | प्रमाण–त्रुटयः | मध्यमानां भेदाः | प्राप्तं 't' मूल्यं |
|---|---|---|---|---|---|---|---|
| उचितप्रयोगशीलाः छात्राः | ९६० | २९.८६ | ५.२८३३ | २१९८ | ०.२१९० | १२.५८ | ५७.४५३* |
| अतिप्रयोगशीलाः छात्राः | १२४० | १७.२८ | ४.८३७० | | | | |

०.०५ सार्थकतास्तरेषु सारणी 't' मूल्यं १.९६०　　　*०.०५ सार्थकतास्तरे सार्थकः

उपर्युक्तं सारण्यां एतत् स्पष्टं जायते यत् प्रसारमाध्यमानाम् अधिकाप्रयोगं कुर्वतां छात्राणां तुलनाया उचितप्रयोगशीलानां छात्राणां मानसिकस्वास्थ्येषु सार्थकभेदः एव दृश्यते तथा उचितप्रयोगशीलानां छात्राणां मानसिकं स्वास्थ्यं उत्तमं वर्तते ।

## सारणी क्र. ४.३

प्रसारमाध्यमानाम् उचितोपयोगं कुर्वतां छात्राणामपेक्षया अत्युपयोगं कुर्वतां छात्राणां च शैक्षणिकसंपादनस्य मध्यमानस्य तुलना –

| समूहः | छात्र–संख्या | मध्य–मानम् | प्रमाण–विचलनम् | स्वाधिनता–मात्राः | प्रमाण–त्रुटयः | मध्यमानां भेदाः | प्राप्तं 't' मूल्यं |
|---|---|---|---|---|---|---|---|
| उचितप्रयोगशीलाः छात्राः | ९६० | ८३.४१ | ११.७२१९ | २१९८ | ०.५०२६ | २६.६७ | ५३.०६९* |
| अतिप्रयोगशीलाः छात्राः | १२४० | ५६.७४ | १९.६४९० | | | | |

०.०५ सार्थकतास्तरेषु सारणी 't' मूल्यं १.९६०　　　*०.०५ सार्थकतास्तरे सार्थकः

उपर्युक्तं सारण्यां एतत् स्पष्टं भवति यत् प्रसारमाध्यमानां उचितप्रयोगं कुर्वतां छात्राणां तुलनाया अतिप्रयोगशिलानां छात्राणां शैक्षिकसम्पादने सार्थकभेदः दृश्यते तथा उचितप्रयोगशीलानां छात्राणां शैक्षिकसम्पादनक्षमता अधिकाउत्तमा दृश्यते ।

**सारणी क्र. ४.४**

प्रसारमाध्यमानाम् उपयोगं तथा सर्जनशीलतायाः सहसम्बन्धस्य दर्शितं सारणी –

| समूहः | छात्र–संख्या | चलः | स्वाधिनता–मात्राः | प्राप्त सहसंबंध गुणकः | सार्थकता स्तरः | अपेक्षित सहसंबंध गुणकः | सार्थक अस्ति/नास्ति |
|---|---|---|---|---|---|---|---|
| सकलाः छात्राः | २२०० | प्रसारमाध्यमस्य प्रयोगः तथा सर्जनशीलता च | २१९८ | ०.५३१ | ०.०५ | .०१९६ | अस्ति |

उपर्युक्तं सारण्यां एतत् स्पष्टं भवति यत् प्रसारमाध्यमानाम् प्रयोगेण छात्राणां सर्जनशीलतायाः मध्यमप्रमाणेन संवर्धनं भवति। अतः प्रसारमाध्यमानाम् उचितप्रयोगेन छात्राणां सर्जनशीलतायाः मध्यम प्रमाणेन संवर्धनं जायते ।

**सारणी क्र. ४.५**

प्रसारमाध्यमानाम् प्रयोगं तथा मानसिकस्वास्थ्यं एतयोः सहसम्बन्धं दर्शितं सारणी–

| समूहः | छात्र–संख्या | चलः | स्वाधिनता–मात्राः | प्राप्त सहसंबंध गुणकः | सार्थकता स्तरः | अपेक्षित सहसंबंध गुणकः | सार्थक अस्ति/नास्ति |
|---|---|---|---|---|---|---|---|
| सकलाः छात्राः | २२०० | प्रसार माध्यमानाम् प्रयोगः तथा मानसिक स्वास्थ्यं च | २१९८ | ०.८६२ | ०.०५ | .०१९६ | अस्ति |

उपर्युक्तं सारण्यां एतत् स्पष्टं भवति यत् प्रसारमाध्यमानां प्रयोगेण छात्राणां मानसिकस्वास्थ्ये संवर्धनं भवेत्। तस्मात् एतदेवोक्तम् यत् प्रसारमाध्यमानाम् उचितप्रयोगेण छात्राणां मानसिकस्वास्थ्ये वृद्धिं भवति।

### सारणी क्र. ४.६

प्रसारमाध्यमानां प्रयोगः तथा शैक्षिकसम्पादनं च एतयोः सहसम्बन्धं दर्शितं सारणी–

| समूहः | छात्र–संख्या | चलः | स्वाधिनता–मात्राः | प्राप्त सहसंबंध गुणकः | सार्थकता स्तरः | अपेक्षित सहसंबंध गुणकः | सार्थक अस्ति/नास्ति |
|---|---|---|---|---|---|---|---|
| सकलाः छात्राः | २२०० | प्रसारमाध्यमानां प्रयोगः शैक्षिकसम्पादनं च | २१९८ | ०.८४६ | ०.०५ | .०१९६ | अस्ति |

उपर्युक्तं सारण्यां एतत् स्पष्टं भवति यत् प्रसारमाध्यमानां प्रयोगेण छात्राणां शैक्षिकसम्पादने वृद्धिं भवति। अतः प्रसारमाध्यमानाम् उचितप्रयोगेन छात्राणां शैक्षिकसम्पादनं वृद्धिं जायते।

### ४.३ परिकल्पनायाः परिशीलनम् –

**१) माध्यमिकस्तरीय छात्राणां सर्जनशीलतायाम् उपरि प्रसारमाध्यमानां धनात्मकः परिणामः न दृश्यते ।**

प्रसारमाध्यमानामुपयोगः तथा छात्राणां सर्जनशीलता इत्यनयोः सहसम्बन्धी–गुणकमूल्यं ०.५३१ इति तथा प्राप्तं सहसम्बन्धस्य गुणकमूल्यम् ०.०५ स्तरे स्वाधीनतामात्रा २१९८ कृते अपेक्षितस्य मूल्यस्य ०.०१९७ तः अधिकमस्ति अतः सार्थकः वर्तते ।

उपर्युक्तं विश्लेषणेन स्पष्टं भवति यद् प्रसारमाध्यमानाम् उपयोगः तथा छात्राणां सर्जनशीलता इत्यनयोः धनात्मकः सार्थकः सहसम्बन्धः वर्तते । अर्थात् प्रसारमाध्यमानाम् उचितप्रयोगेण छात्राणां सर्जनशीलता मध्यमरुपेण वर्धते । अतः उपर्युक्ता परिकल्पना न स्वीक्रियते ।

**२) माध्यमिकस्तरीय छात्राणां मानसिकस्वास्थ्यस्योपरि प्रसारमाध्यमानां धनात्मकपरिणामः न दृश्यते ।**

प्रसारमाध्यमानामुपयोगः तथा छात्राणां सर्जनशीलता इत्यनयोः सहसम्बन्ध–गुणकमूल्यं ०.८६२ इति विद्यते । तद् मूल्यं ०.०५ स्तरे स्वाधीनतामात्रा २१९८ कृते अपेक्षितस्य मूल्यस्य ०.०१९६ इत्यस्मात् आधिक्यात् सार्थकं वर्तते ।

उपर्युक्तविश्लेषणेन ज्ञायते यद् प्रसारमाध्यमानां प्रयोगः तथा छात्राणां मानसिकस्वास्थ्यं इत्यनयोः धनात्मकः सहसम्बन्धः वर्तते । प्रसारमाध्यमानां प्रयोगानुगुणं छात्राणां मानसिकस्वास्थ्यामपि वर्धते । अतः उपर्युक्ता परिकल्पना न स्वीक्रियते ।

**३) माध्यमिकस्तरीय छात्राणां शैक्षणिकसम्पादनक्षमतायामुपरि प्रसारमाध्यमानां धनात्मकप्रभावः न दृश्यते ।**

प्रसारमाध्यमानां प्रयोगः तथा छात्राणां शैक्षिकसम्पादनक्षमता इत्यनयोः सहसम्बन्ध–गुणकमूल्यं ०.८४६ इति वर्तते । प्राप्तं सहसम्बन्ध गुणकमूल्यं ०.०५ स्तरे स्वाधीनतामात्रा २१९८ इत्यर्थे अपेक्षितमूल्यस्य ०.०१९६ इत्यस्मात् आधिक्यात् सार्थक वर्तते।

उपर्युक्तविश्लेषणेन स्पष्टं भवति यद् प्रसारमाध्यमानां प्रयोगः तथा शैक्षणिक–सम्पादनक्षमता इत्यनयोः घनिष्ठः सार्थसहसम्बन्धः वर्तते । अर्थात् प्रसारमाध्यमानाम् उचितप्रयोगेण शैक्षिकसम्पादनक्षमता वर्धते। अतः उपर्युक्ता परिकल्पना न स्वीक्रियते ।

**४) प्रसारमाध्यमानाम् उचितरुपेण प्रयोगशीलानां छात्राणां तथा अतिशयेन प्रयोगशिलानां छात्राणां सृर्जनशीलतायां सार्थकभेदः न दृश्यते ।**

प्रसारमाध्यमानां उचितरुपेण प्रयोगशीलानां छात्राणां तथा आतिशयेनप प्रयोगशीलानां छात्राणां सर्जनशीलतायाः प्राप्तं 'टी' मूल्यं १९.५६७ इति अस्ति । तद् स्वाधीनतामात्रा २१९८ तथा ०.०५ सार्थकस्यरस्य सारणी 'टी' मूल्यं १.९६० इत्यस्य अपेक्षया बहु–आधिक्यत्वात् सार्थकं वर्तते । प्रसारमाध्यमानाम् उचितरुपेण प्रयुक्तानां छात्राणां सर्जनशीलतायाः ''टी'' मध्यमानम् ५४.५५ इति वर्तते । तथा अतिशयेन प्रयुक्तानां छात्राणां मध्यमानम् ३८.६४ वर्तते।

उपर्युक्तविश्लेषणेन स्पष्टं भवति यद् प्रसारमाध्यमानां उचितरुपेण प्रयोगशीलानां छात्राणां अतिशयेन प्रयोगशीलानां छात्राणां सर्जनशीलतायां सार्थकभेदः दृश्यते । तथैव उचितरुपेण प्रसारमाध्यमानां प्रयोगशीलानां छात्राणां तुलनया अतिशयेन प्रयोगशिलानां छात्राणां सर्जनशीलता न्यूना दृश्यते । अतः उपर्युक्तापरिकल्पना न स्वीक्रियते ।

**५) प्रसारमाध्यमानाम् उचितरुपेण प्रयुक्तानां तथा अतिशयेन प्रयुक्तानां छात्राणां मानसिकस्वास्थ्ये सार्थकभेदः न दृश्यते ।**

प्रसारमाध्यमानाम् उचितरुपेण प्रयुञ्जतां छात्राणां तथा आतिशयेन प्रयुञ्जतां छात्राणां मानसिकस्वास्थ्यस्य प्राप्तं ''टी'' मूल्यं ५७.४५३ इति वर्तते । तस्य स्वाधीनतामात्रा २१९८ तथा ०.०५ सार्थकतास्तरस्योपरि सारणी ''टी'' मूल्यं १.९६० इत्यस्य अपेक्षया आधिक्यात्वात् सार्थकम् आस्ति । प्रसारमाध्यमानाम् उचितरुपेण प्रयुक्तानाम् छात्राणां मानसिकस्वास्थ्यस्य मध्यमानं २९.८६ इति अस्ति तथा आतिशयेन प्रयुञ्जतां छात्राणां मध्यमानं १७.२८ इति वर्तते ।

अनेन एवं निष्कर्षः भवति यद् प्रसारमाध्यमानाम् उचितरुपेण प्रयुञ्जतां छात्राणां मानसिकस्वास्थ्ये सार्थकभेदः दृश्यते अतः आतिशयेन प्रयुञ्जतां छात्राणां तुलनया उचितरुपेण प्रयुञ्जतां छात्राणां मानसिकस्वास्थ्यम् अधिकरुपेण उत्तमम् अस्ति।

**६) प्रसारमाध्यमानाम् उचितरुपेण प्रयुञ्जतां छात्राणां तथा अतिशयेन प्रयुञ्जतां छात्राणां शैक्षणिकसम्पादनक्षमतायां सार्थकभेदः न दृश्यते।**

प्रसारमाध्यमानाम् उचितरुपेण प्रयुञ्जतां तथा अतिशयेन प्रयुञ्जतां छात्राणां शैक्षणिक–सम्पादनक्षमतायाः प्राप्तं ''टी'' मूल्यं ५३.०६९ इति अस्ति । तस्य स्वाधीनतामात्रा २१९८ तथा ०.०५ सार्थकतास्तरस्य सारणी 'टी' मूल्यम् १.९६० इत्यस्य अपेक्षया आधिक्यत्वात् सार्थकं वर्तते । प्रसारमाध्यमानाम् उचितरुपेण प्रयुञ्जतां छात्राणां शैक्षणिक–सम्पादनक्षमतायाः मध्यमानं ८३.४१ इति अस्ति तथा आतिशयेन प्रयुञ्जतां छात्राणां मध्यमानं ५६.७४ इति वर्तते ।

उपर्युक्तविश्लेषणेन अयं स्पष्टं भवति यत् माध्यमिकस्तरस्य बहवः छात्राः प्रसारमाध्यमानाम् अत्यधिकमं उपयोगं कुर्वन्ति, अनेन बालिकानां अपेक्षया बालकानां प्रमाणम् अधिकं दृश्यते अतः उपर्युक्ता परिकल्पना अंशतः स्वीकृता।

**७) माध्यमिकस्तरीय बहवः छात्राः प्रसारमाध्यमानाम् अत्यधिकम् उपयोगं कुर्वन्ति अतः बालक–बालिकानां मध्ये सार्थकः भेदः नैव दृश्यते।**

सर्वेषु छात्रेषु ९२.४५% बालकाः प्रसारमाध्यमानां अत्यधिकमुपयोगं कुर्वन्ति, तत्र ७.५५% छात्राः उचितरूपेण उपयोगं कुर्वन्ति । परन्तु छात्रासु ७९.७३% बालिकाः प्रसारमाध्यमानां उचितरुपेण प्रयोगं कुर्वन्ति तत्र २०.२७% बालिकाः अत्याधिकम् प्रयोगं कुर्वन्ति ।

उपरोक्त–विश्लेषणेन अयं स्पष्टं भवति यत् माध्यमिकस्तरीय छात्राः प्रसारमाध्यमानामुपयोगं अत्याधिकं कुर्वन्ति, अनयोः बालिकानां तुलनया बालकाः अत्याधिकं कुर्वन्ति ।अतः उपरोक्ता परिकल्पना अंशतः स्वीकृता।

**८) नगर–उपनगरक्षेत्रयोः छात्राणां प्रसारमाध्यमानाम् उपयोगमध्ये सार्थकः भेदः न दृश्यते ।**

नगर–उपनगर क्षेत्रयोः छात्राणां प्रसारमाध्यमस्य उपयोगस्य प्राप्तं 'टी' मूल्यं ०१.५८२ वर्तते । तस्य स्वाधिनतामात्रा २१९८ तथा ०.०५ सार्थकतास्तरस्य सारण्याः 'टी' मूल्यं १.९६० अपेक्षया अधिकमिति कारणेन सार्थकः वर्तते। नगरक्षेत्रस्य छात्राणां प्रसारमाध्यमानाम् उपयोगस्य मध्यमानं ६६.६३ तथा उपनगरक्षेत्रस्य छात्राणां ७३.७९ इति वर्तते ।

उपर्युक्तविश्लेषणेन अयं स्पष्टं भवति यत् नगर–उपनगरक्षेत्रयोः छात्राणां प्रसारमाध्यमानाम् उपयोगमध्ये सार्थकः भेदः दृश्यते । नगरक्षेत्रस्य छात्राणां तुलनया उपनगरक्षेत्रस्य छात्राः प्रसारमाध्यमानाम् उपयोगम् उचितरुपेण कुर्वन्ति इति दृश्यते। अतः उपयुक्ता परिकल्पना अस्वीकृता।

**९) नगर–उपनगरक्षेत्रयोः छात्राणां सर्जनशीलतायां सार्थकभेदः न दृश्यते ।**

नगर–उपनगरक्षेत्रयोः छात्राणां सर्जनशीलतायाः प्राप्तं *'t'* मूल्यं ३.६३८ इति अस्ति तत्र स्वाधीनतामात्रा २१९८ तथा ०.०५ सार्थकतास्तरस्य सारण्यां *'t'* मूल्यं १.९६० इत्यस्मात् आधिक्यत्वात् सार्थकं वर्तते । नगरक्षेत्रस्य छात्राणां सर्जनशीलतायाः मध्यमानं ४४.०१ इति वर्तते तथा उपनगरक्षेत्रस्य छात्राणां ४७.१५ इति अस्ति ।

अनेन स्पष्टं भवति यद् नगर – उपनगरक्षेत्रयोः छात्राणां सर्जनशीलतायां सार्थकभेदः दृश्यते । तथैव नगरछात्राणां तुलनया उपनगरछात्राणां सर्जनशीलता अधिकं वर्तते इति ज्ञायते । अतः उपर्युक्ता परिकल्पना न स्वीक्रियते ।

**१०) नगर–उपनगरछात्राणां मानसिकस्वास्थ्ये सार्थकभेदः न दृश्यते ।**

नगर–उपनगरछात्राणां मनःस्वास्थ्यस्य प्राप्तं *'t'* मूल्यं ७.८५७ इति वर्तते तत्र स्वाधीनतामात्रा २१९८ तथा ०.०५ सार्थकतास्तरस्य सारण्या *'t'* मूल्यं १.९६० इत्यस्मात् आधिक्यत्वात् सार्थकं वर्तते । नगरक्षेत्रस्य छात्राणां मानसिकस्वास्थ्यस्य मध्यमानं २१.४५ इति अस्ति तथा उपनगरछात्राणां मध्यमानं २४.१० इति वर्तते।

उपर्युक्तविश्लेषणेन स्पष्टं भवति यद् नगर – उपनगरछात्राणां मानकिसस्वास्थ्ये सार्थकभेदः दृश्यते । तथैव नगरछात्राणां तुलनया उपनगरछात्राणां मानसिकस्वास्थ्यं अधिकतया उत्तमं विद्यते । अतः उपर्युक्ता परिकल्पना न स्वीक्रियते ।

**११) नगर–उपनगरछात्राणां शैक्षणिक सम्पादनक्षमतायां सार्थकभेदः न दृश्यते ।**

नगर–उपनगरछात्राणां शैक्षणिकसम्पादनक्षमतायां प्राप्तं *'t'* मूल्यं ८.४५२ इति अस्ति स्वाधीनतामात्रा २१९८ तथा ०.०५ सार्थकतास्तरस्य सारणी *'t'* मूल्यं १.९६० इत्यस्मात् आधिक्यत्वात् सार्थकं वर्तते । नगरक्षेत्रस्य छात्राणां शैक्षणिक सम्पादनक्षमतायां मध्यमानं ६५.२५ इति विद्यते तथा उपनगरछात्राणां मध्यमानं ७१.५१ इति वर्तते।

अनेन स्पष्टं भवति यद् नगर – उपनगरछात्राणां शैक्षणिक सम्पादनक्षमतायां सार्थकभेदः दृश्यते । तथा नागरछात्राणां तुलनया उपनगरछात्राणां शैक्षणिक सम्पादनक्षमतायाम् अधिका तथा उत्तमा। अतः उपर्युक्ता परिकल्पना न स्वीक्रियते।

***-*-***

# पंचम् प्रकरणम्

# सारांशः, निष्कर्षाः, सूचना च

संशोधनकार्यस्य अंतिमचरणः निष्कर्षः सूचना च वर्तते । प्रस्तूत संशोधनानन्तरं निष्कर्षाः प्राप्ताः । तेषां कृते निम्नलिखितं संशोधनकार्यं कृतम् ।

## ५.१ सारांश

संशोधनकार्यस्य स्वरुपं निश्चितं कृत्वा कार्यसाफल्यार्थं कार्यस्त्रोतं निश्चितीकरणं कृतम् । संपूर्णः संशोधनकार्यं पञ्चप्रकरणेषु विभाजितम् ।

## ५.२ निष्कर्षाः

१) माध्यमिकस्तरीय बहवः छात्राः प्रसारमाध्यमानाम् अतिशयेन प्रयोगं कुर्वन्ति । बालिकानां तुलनया बालकानां प्रमाणं तथा नागरीछात्राणां तुलनया अर्धनागरी छात्राणां प्रमाणं अधिकं वर्तते ।

२) प्रसारमाध्यमानाम् उचितप्रयोगशिलानां छात्राणां तथा अतिप्रयोगशिलानां छात्राणां सर्जनशिलतायां सार्थकः भेदः वर्तते तथा प्रसारमाध्यमानां प्रयोगं ये छात्राः उचितरुपेण कुर्वन्ति तेषां तुलनया अतिशयेनप्रयोगं क्रियमाणानां छात्राणां सर्जनशीलता न्यूना वर्तते ।

३) प्रसारमाध्यमानाम् उचितप्रयोगशीलानां छात्राणां मानसिकस्वास्थ्यं अतिप्रयोगशिलानां छात्राणाम् अपेक्षया उत्तमं वर्तते ।

४) प्रसारमाध्यमानाम् उचितप्रयोगशीलानां छात्राणां शैक्षिकसम्पादनक्षमताः अतिप्रयोगशिलानां छात्राणाम् अपेक्षया उत्तमा वर्तते ।

५) बालकानां अपेक्षया बालिकानां सर्जनशिलता उत्तमा वर्तते ।

६) बालकानां अपेक्षया बालिकानां मानसिकस्वास्थ्यम् उत्तमं वर्तते ।

७) बालकानां अपेक्षया बालिकानां शिक्षासम्पादनक्षमता उत्तमा वर्तते ।

८) बालकानां अपेक्षया बालिकानां प्रसारमाध्यमानां प्रयोगक्षमता उत्तमा वर्तते ।

९) नागरीक्षेत्राणां छात्राणां तुलनया अर्धनागरी क्षेत्राणां छात्राणां सर्जनशिलता उत्तमा वर्तते ।

१०) नागरीक्षेत्राणां छात्राणां तुलनया अर्धनागरीक्षेत्राणां छात्राणां मानसिकस्वास्थ्यम् उत्तमं वर्तते ।

११) नागरीक्षेत्राणां छात्राणां तुलनया अर्धनागरीक्षेत्राणां छात्राणां शिक्षासम्पादनक्षमता उत्तमा वर्तते ।

१२) नागरीक्षेत्राणां छात्राणां तुलनया अर्धनागरीक्षेत्राणां छात्राः प्रसारमाध्यमानाम् उचितरुपेण प्रयोगं कुर्वन्ति ।

१३) नागरीक्षेत्राणां छात्राणां तुलनया अर्धनागरीक्षेत्राणां छात्राणां सर्जनशिलता उत्तमा वर्तते ।

१४) नागरीक्षेत्राणां छात्राणां तुलनया अर्धनागरीक्षेत्राणां छात्राणां मानसिक स्वास्थ्यं उत्तमं अस्ति।

१५) नागरीक्षेत्राणां छात्राणां तुलनया अर्धनागरी क्षेत्राणां छात्राणां शिक्षासम्पादनक्षमता उत्तमा वर्तते ।

१६) नागरीक्षेत्राणां छात्राणां तुलनया अर्धनागरीक्षेत्राणां छात्राः प्रसारमाध्यमानाम् उचितं प्रयोगं कुर्वन्ति।

१७) नागरीक्षेत्राणां बालिकानां तुलनया अर्धनागरीक्षेत्राणां बालिकानां सर्जनशीलता उत्तमा वर्तते ।

१८) नागरीक्षेत्राणां बालिकानां तुलनया अर्धनागरीक्षेत्राणां बालिकानां मानसिकस्वास्थ्यं उत्तमं वर्तते ।

१९) नागरीक्षेत्राणां बालिकानां तुलनया अर्धनागरी क्षेत्राणां बालिकानां शिक्षासम्पादनक्षमता उत्तमा वर्तते ।

२०) नागरीक्षेत्राणां बालिकानां तुलनया अर्धनागरीक्षेत्राणां छात्राः प्रसारमाध्यमानां प्रयोगम् उचितरुपेण कुर्वन्ति इति दृश्यते।

२१) प्रसारमाध्यमानां प्रयोगं तथा छात्राणां सर्जनशिलता एत्यनयोः मध्ये धनात्मकः मध्यमः सार्थकः सहसम्बन्धः च अस्ति । अतः प्रसारमाध्यमानाम् उचितप्रयोगेन छात्राणां सर्जनशिलतायाः मध्यमप्रमाणे वृद्धिं भवति ।

२२) प्रसारमाध्यमानां प्रयोगं तथा छात्राणां मानसिकस्वास्थ्यं इत्यनयोः मध्ये धनात्मकः घनिष्ठं सार्थकः सहसम्बधः अस्ति । अतः प्रसारमाध्यमानाम् उचितप्रयोगेन छात्राणां मानसिकस्वास्थ्ये वृद्धिं वर्तते।

२३) प्रसारमाध्यमानां प्रयोगं तथा छात्राणां शैक्षिकसम्पादनक्षमताया मध्ये धनात्मकः मध्यमः सार्थकः च वर्तते । अतः प्रसारमाध्यमानां उचितप्रयोगेन छात्राणां शैक्षिकसम्पादनक्षमतायां वृद्धिं भवति।

२४) प्रसारमाध्यमानां प्रयोगः बालक–बालिकानां इत्यनयोः सर्जनशिलतामध्ये धनात्मकः सहसम्बन्धः अस्ति।

२५) प्रसारमाध्यमानाम् उपयोगेन बालक–बालिकानां मानसिकस्वास्थ्ये वृद्धिं भवति । तत्र बालकानामपेक्षया बालिकानां मानसिकस्वास्थ्ये अधिकं वृद्धिं वर्तते।

२६) प्रसारमाध्यमानाम् उपयोगेन बालक–बालिकानां शैक्षिकसम्पादनक्षमतायां वृद्धिं भवति। तत्र बालकानामपेक्षया बालिकानां अधिकं भवति।

२७) प्रसारमाध्यमानाम् उपयोगेन नागरी–अर्धनागरी क्षेत्रयोः छात्राणां सर्जनशीलतायां मध्यमप्रमाणे वृद्धिं भवति।

२८) प्रसारमाध्यमानाम् प्रयोगेन नागरी–अर्धनागरी क्षेत्रयोः छात्राणां मानसिकस्वास्थ्ये सकारात्मक वृद्धिं भवति।

२९) प्रसारमाध्यमानाम् प्रयोगेण नागरी–अर्धनागरी क्षेत्रयोः छात्राणां शैक्षणिकसम्पादनक्षमतायां वृद्धिं भवति।

## ५.३ सामान्य निष्कर्षाः

माध्यमिकस्तरीयाः अधिकतराः छात्राः प्रसारमाध्यमानां प्रयोगः अतिशयेन कुर्वन्ति । एतेषु बालिकानां तुलनया बालकानां, तेषु नागरीक्षेत्रस्य तुलनया अर्धनागरी क्षेत्राणां छात्राणां प्रमाणम् अधिकं वर्तते।

प्रसारमाध्यमानाम् उचितं प्रयोगशिलानां छात्राणां अतिप्रयोगशिलानां छात्राणां च सर्जनशिलता, मानसिकस्वास्थ्यं शैक्षिकसम्पादने च सार्थकाः भेदाः दृश्यन्ते । प्रसारमाध्यमानां उचितं प्रयोगं क्रियमाणानां छात्राणां तुलनया अतिप्रयोगशिलानां छात्राणां सर्जनशिलता मानसिकस्वास्थ्यं, शैक्षिकसम्पादनं च न्यूना दृश्यन्ते ।

बालकानां बालिकानां च सर्जनशिलता, मानसिकस्वास्थ्यं, शैक्षिकसम्पादन सार्थकाः भेदाः दृश्यन्ते । बालकानां तुलनया बालिकानां सर्जनशिलता, मानसिकस्वास्थ्यं, शैक्षिकसम्पादनं च एतेषां प्रमाणं अधिकं वर्तते ।

नागरी–अर्धनागरी च छात्राणां सर्जनशीलता, मानसिकस्वास्थ्यं, शिक्षासम्पादने च सार्थकाः भेदाः दृश्यन्ते । नागरी तुलनया अर्धनागरीक्षेत्रीय छात्राणां सर्जनशीलता, मानसिकस्वास्थ्यं शैक्षिकसम्पादनं च एतेषां प्रमाणं अधिकम् अस्ति ।

प्रसारमाध्यमानां प्रयोगः छात्राणां सर्जनशीलता एतयोः धनात्मकमध्यमस्तरीय सार्थकः सहसंबंध अस्ति, तथा छात्राणां मानसिकस्वास्थ्यं शैक्षिकसम्पादनं च एतयोः धनात्मकसार्थकः घनिष्ठः सहसंबंधः वर्तते । तस्मात् प्रसारमाध्यमानाम् उचितप्रयोगेन छात्राणां सर्जनशीलतायां मध्यमप्रमाणे तथा मानसिकस्वास्थ्ये शैक्षिकसम्पादने च सकारात्मक वृद्धिं वर्तते । प्रसारमाध्यमानाम् उचितप्रयोगस्य सर्वाधिक उत्तमं परिणामानि छात्राणां मानसिकस्वास्थ्ये, शैक्षिकसम्पादने च दृश्यते ।

## ५.४ शिफारशी

१) छात्रा प्रसार माध्यमानां प्रयोगः न्यूनि कुर्युः।

२) दूरदर्शने भ्रमणध्वनेः च प्रसारीताः अयोग्याः कार्यक्रमाः त्यजेत।

३) प्रसार माध्यमानां प्रयोगः छात्राः आत्मानः शैक्षणिक ज्ञानस्य स्तरस्य वृद्धयर्थं कुर्युः।

४) छात्राः संगणकस्य प्रयोगः स्पर्धापरीक्षा, शैक्षणिकप्रकल्पं तथा अन्य शिक्षाविषयकं कार्यक्रमाणां कृते कुर्युः।

५) छात्राः मुखपुस्तिकाया (Facebok) प्रयोगः न कुर्वन्तु ।

६) ‘व्हॉटस् ॲप’ इत्यस्य प्रयोगः छात्राः आत्मनः गृहकार्यस्य पूर्ततायां कृते तथा अध्ययनस्य पूर्ततायां कृते कुर्वन्तु ।

७) ''Electronic Media'' इत्यस्य प्रयोगः न्यूनि कुर्वन्तु येन छात्राणां मानसिकस्वास्थ्ये, सर्जनशीलतायां अनुचितं परिणामं न भवेत्।

८) आन्तरजालं, गुगल इत्यस्य प्रयोगः छात्राः शैक्षणिकज्ञानप्राप्त्यर्थं अथवा कस्यचित् विषयस्य सूक्ष्मज्ञानप्राप्त्यतर्थं कुर्वन्तु ।

९) छात्राः प्रसारमाध्यमेषु प्रतिविषयस्य ज्ञानप्राप्त्यार्थं निर्भरशीला न भवेयुः।

**पालकानाम् कृते विशिष्टाः सूचनाः –**

१) पालकैः पाल्यान् प्रसारमाध्यमानां अतिप्रयोगं कर्तुम् अनुमतिं न प्रदेयुः ।

२) प्रसारमाध्यमानां अतिप्रयोगेन ये दुष्परिणामानि सन्ति तेषां प्रति पाल्यान् ज्ञापनं आवश्यकम् ।

३) पाल्यानां कृते आन्तरजालस्य प्रयोगः कदा योग्यम् इति पालकैः निश्चितिं करणीयम् ।

४) आन्तरजालस्य प्रयोगं विना आत्मनः स्मरणशक्तेः सर्जनशीलतायाः वर्धनं कथं शक्यं इति विषये विविधैः उदाहरणैः ज्ञापितुं शक्यते ।

५) छात्राम् ग्रन्थानां महत्त्वं अवश्यं वक्तव्यम्।

६) आंतरजालस्य प्रयोगेन छात्राणां स्मरणशक्तेः ह्रासः भवति इति ज्ञापनम् आवश्यकम् करणीयम्।

**सर्वकारस्य कृते विशिष्टाः सूचना –**

१) सर्वकारेण आंतरजालस्य प्रयोगार्थं छात्राणां कृते वयोमर्यादाः निश्चितकरणं अवश्यं करणीयम् ।

२) आन्तरजालस्य प्रयोगाः कथं करणीयम् इत्यर्थं केचन उपक्रमाणाम् आयोजनं करणीयम् ।

३) सर्वकारेण पालकानाम् आंतरजालविषयकं जागृतिकरणीयम् ।

४) आन्तरजालस्य के के दुष्परिणामानि भवन्ति इत्यस्मिन् विषये पालकानां पाल्यानां च कार्यशालायाः आयोजनं करणीयम् ।

५) शालेय छात्राः आन्तरजालस्य अधिकं प्रयोगं न कुर्युः एतस्य कृते शिक्षकस्य जागरुकता आवश्यकम्।

६) विविधैः पथनाट्यालां अथवा उपक्रमाणां आयोजनं कृत्वा आन्तरजालस्य परिणामः दुष्परिणामः च इत्यस्मिन विषये कथयितुं सर्वकारेण प्रयत्नानि अवश्यमेव करणीयानि ।

## ५.५ अग्रिम संशोधनस्य दिशा

१) माध्यमिकस्तरीय छात्राणां व्यक्तिमत्वे प्रसारमाध्यमानां परिणामः एक अध्ययनम् ।

२) माध्यमिकस्तरीय छात्राणां स्मरणशक्तेः आन्तरजालस्य परिणामः एकं अध्ययनम् ।

३) उच्चमाध्यमिकस्तरीय छात्राणां सर्जनशीलतायां प्रसारमाध्यमानां परिणामः एक अध्यनम् ।

४) उच्चमाध्यमिकस्तरीय छात्राणां मानसिकस्वास्थ्ये आन्तरजालस्य परिणामः– एकः अभ्यासः ।

५) उच्चमाध्यमिकस्तरीय छात्राणां सर्जनशीलता, मानसिकस्वास्थ्यं शिक्षासंपादने च प्रसारमाध्यमानां परिणामः एकं अध्ययनम् ।

## ५.६ प्रस्तुत संशोधनस्य निष्कर्षस्य पूर्वसंशोधननिष्कर्षेण सहतुलना

१) प्रसारमाध्यमानां प्रयोगे तथा छात्राणां शैक्षणिक–सम्पादन–क्षमतायां धनात्मकः घनिष्ठः सार्थकः सहसम्बन्धः वर्तते।

Chadha, N.K. and Chandna, S. (१९९०) एताभ्यां "Creativity, Intelligence and Scholastic Achievement : A Residual Study" इत्यस्य अध्ययनं कृतम् । ताभ्यां ज्ञातं यद् सर्जनशीलता – बुद्धिमत्तयो, सर्जनशीलता – शैक्षणिकसम्पादनयोः तथा बुद्धिमत्ता – शालेयः सम्पादनयोः सकारात्मकाः सार्थकसम्बन्धाः सन्ति । प्रस्तुताध्ययनस्य निष्कर्षाः तथा Chadha, N.K. and Chandna, S. इत्येताभ्यां प्राप्तेषु निष्कर्षेषु साधर्म्य दृश्यते ।

**२) नागर – उपनागरछात्राणां सर्जनशीलतायां सार्थकभेदः दृश्यते तथा नागरछात्राणां तुलनया उपनागरछात्राणां सर्जनशीलता अधिकतया उत्तमा इति ज्ञायते ।**

Choudhary G.G. (१९८३) इत्यनेन "An investigation into the Trends of Creative Thinking Ability of Pupils of Age Group ११ to १३ in relation to some Psycho-socio correlates" इत्यस्य अध्ययनं कृतम् । तेन ग्रामीण–नागरक्षेत्रयोः बालक–बालिकानां सृजनशील विचारक्षमतायाः मध्यमाने सार्थकभेदः न प्राप्तः । प्रस्तुत संशोधनस्य निष्कर्षे तथा Choudhary G.G. अनेन प्राप्ते निष्कर्षे भेदः दृश्यते ।

३) **नागर – उपनागरछात्राणां सर्जनशीलतायां सार्थकभेदः दृश्यते तथा नागरछात्राणां तुलनया उपनागरछात्राणां सर्जनशीलता अधिका वर्तते ।**

Gupta, Krishna Kumari (१९८८) इत्यनया "The Creative development of secondary school children in relation to Sex, Inteligence and Urban & Rural background" इत्यस्य अध्ययनं कृतम् । तथा विशेषतः ११ तः १५ वयीनाः नागरछात्रा तथा ग्रामीण छात्राणां तुलनया सर्जनशीलतायां श्रेष्ठाः मत्यन्ते प्रस्तुतसंशोधनस्य अस्मिन् निष्कर्षे भेदः दृश्यते ।